# 1 आरम्भः

This Thesis has been divided into 4-sections, aligning with the 4-stages of Yoga.

1. Ārambhaḥ - Beginning of the thesis, briefly explaining Śatarudrīyam, Vedāṅgās and the Tattvārtha-darśanam.
2. Ghaṭaḥ - The container holding the Six Vedāṅgās and the revelation of tattvārtha in each of the Vedāṅga, and correlation to Śatarudrīyam as applicable.
3. Paricayaḥ - Introduction to Śatarudrīyam, and etymological derivation of each word and the tattvārtha in the 11-anuvākās.
4. Niṣpattiḥ - The conclusion, summarizing the Vedāṅgās and Śatarudrīyam as Iśvara-praṇidhāna technique for achieving the puruṣārthās including the Kaivalya.

This study focusses on understanding the tattvārtha described in Sāṅkhya-Yoga darśanās, through Śatarudrīyam mantras by studying the vedāṅgās.

The anubandha catuṣṭayam of this study is—

1. adhikārī → having interest in the self-realization (jijñāsuḥ / mumukṣuḥ)
2. sambandhaḥ → lakṣaṇā - lakṣya sambandham, because Brahman cannot be explained through vācaka - vācya sambandha.
    - śabda-artha-jñāna are the 3 aspects of the same tattva, while only artha (=bhāvanā) remains towards the realization—
    - तत्र शब्द+अर्थ+ज्ञान विकल्पैः सङ्कीर्णा सवितर्का समापत्तिः । योगसूत्रम् 1.42 ॥
    - स्मृतिपरिशुद्धौ स्वरूपशून्य+इव अर्थमात्र निर्भासा निर्वितर्का । योगसूत्रम् 1.43 ॥
3. viṣayaḥ → Śatarudrīyam vedāṅga sahitam.
4. prayojanam → tattvārtha darśanam.

## 1.1 शतरुद्रीयम्

Śatarudrīyam, also called as śrī rudram, namaka-camakam, is the set of mantras from Kṛṣṇa Yajurveda, taittirīya saṃhitā, 4th kāṇḍa. The 11 anuvākās from the 5th prapāṭhaka are called namakam, and the 11 anuvākās from the 7th prapāṭhaka are called camakam. Together is called Śatarudrīyam. The meaning of the word śata is 100 in Sanskrit, which indicates the Yajurveda having 101 śākhās (branches). So, Śatarudrīyam indicates the glory of Rudra described in these 100 branched Yajurveda— शते शाखासु पठ्यते रुद्रीयं शतरुद्रीयम् ।. Śatam also implies दश दशगुणं शतम् । So, this indicates the progress of a yogi from material phase (viṣayātmaka daśā) to spiritual phase (ādhyātmika daśā)— जीवस्य शतस्य / शतदशस्य रुद्रगुणं शतरुद्रम् । तस्येदं शतरुद्रीयम् ।. The word śata also indicates infinity, so, the set of mantras, where Rudra is glorified is called Śatarudrīyam.

The word Rudra in these mantras indicates the Brahman only. The etymological explanation has several interpretations for this word Rudra. The Sanskrit roots: rudir (रुदिर् अश्रुविमोचने ।), drā (द्रा कुत्सायां गतौ ।), ru (रु शब्दे ।), dru (द्रु गतौ ।), rā (रा दाने ।) explain the essence of philosophy behind this word Rudra. A brief explanation is—

*Table 1. Etymological derivations of the word "Rudra"*

| | |
|---|---|
| रुदिर् अश्रुविमोचने । | • रोदयति असुरान् इति रुद्रः । रोदयति शत्रून् रुद्रः । रोदयति अन्यान् इति रुद्रः । रोदयति अनात्मनः इति रुद्रः । रोदयति द्वैतभावान् इति रुद्रः ।<br>• स्वयं रुरोद इति रुद्रः । (एकदा ब्रह्मानुरोधेन प्राप्तजन्मपरिग्रहः असौ रुरोद इति पुराण प्रसिद्धिः ।) |
| द्रा कुत्सायां गतौ । | • रुजं = दुःखम्, द्रवायन्ति इति रुद्राः । |
| रु शब्दे ।<br>द्रु गतौ । | • रुतं = वेदात्मकं शब्दम्, कल्पादौ रुवन्ति इति रुद्राः ।<br>• रुत्या धर्मान् अवलोकयति प्रापयति वा इति रुद्रः ।<br>• रुत्या = वेदरूपेण, आध्यात्मिक तेजो भूत्वा, रोदयति द्वैतभावान् इति रुद्रः ।<br>• रुदं = रोदनं, द्रावयति इति रुद्रः । |

| | |
|---|---|
| | • रुतौ = शब्दौ, नादौ; द्रवति द्रावयति वा इति रुद्रः ।<br>• रोरूयमाणो द्रवति = प्रविशति मर्त्यान् इति रुद्रः । |
| रुक् = तेजः | • अस्मिन् अस्ति इति रुद्रः । |
| रा दाने । | • रुतिं राति इति रुद्रः ।<br>• रुतिं = वेदरूपशब्दं, ब्रह्मणे कल्पादौ राति इति रुद्रः । |

- रोदयति रुद्रः । who causes sufferings to the 6 enemies— kāma, krodha, lobha, moha, mada, mātsarya)
- स्वयं रुरोद इति रुद्रः । who suffered himself, by entering into the mortal world.
- रुतौ = शब्दौ, नादौ, द्रवति द्रावयति वा इति रुद्रः । who entered the śabda in both manifested and unmanifested forms.
- रोरूयमाणो, द्रवति = प्रविशति, मर्त्यान् इति रुद्रः । who entered the mortals in the form of nāda.
- रुक् = तेजः, अस्मिन् अस्ति इति रुद्रः । in whom, the supreme tejas exists.

Thus, a good understanding of Śatarudrīyam is essential in both overcoming the three types of sufferings (ādhyātmika, ādhibhautika and ādhidaivika) and also in reaching the state of Kaivalyam.

## शतरुद्रीयस्य प्राशस्त्यम्

A brief review of literature has been described below, on the importance of Śatarudrīyam and its usage in both self-realization and also in the worldly benefits.

- ✓ Śatarudrīyam is considered as the best of Yajurveda— सामवेदश्च वेदानां यजुषां शतरुद्रियम् । सनत्कुमारो योगीनां साङ्ख्यानां कपिलो ह्यसि ॥ महाभारते 13.14.159 ॥
- ✓ Kaivalyopaniṣat describes that, who studies / performs Śatarudrīyam gets freed from all sins and reaches the state of kaivalyam— यः शतरुद्रियमधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति स ब्रह्महत्यायाः पूतो भवति स सुवर्णस्तेयात्पूतो भवति स कृत्याकृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्यत्याश्रमी सर्वदा सकृद्वा जपेत् ॥ अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते कैवल्यं पदमश्नुत इति ॥ 2.24॥

- ✓ Jabālopaniṣat describes that, Śatarudrīyam frees from mortality— अथ हैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति ॥ स होवाच याज्ञवल्क्यः । शतरुद्रियेणेत्येतान्येव ह वा अमृतस्य नामानि ॥ एतैर्ह वा अमृतो भवतीति एवमेवैतद्याज्ञवल्क्यः ॥ 3॥
- ✓ Mahābhārata describes that, Śatarudrīyam has been chanted by Kṛṣṇa and Arjuna on the night of 13th day, while pleasing the Lord Śiva for recollecting the Pāśupatāstra— ततः कृष्णश्च पार्थश्च संस्पृश्यापः कृताञ्जली । तौ नागावुपतस्थाते नमस्यन्तौ वृषध्वजम् ॥70॥ गृणन्तौ वेदविदुषौ तद्ब्रह्म शतरुद्रियम् । अप्रमेयं प्रणमन्तौ गत्वा सर्वात्मना भवम् ॥71॥ (महाभाराते – द्रोणपर्वे – प्रतिज्ञापर्वे – 57 अध्यायः ।)
- ✓ Āpastamba śrauta sūtras describe the performance of homa with Śatarudrīyam as the fulfiller of all desires— यो रुद्रो अग्नाविति रौद्रं गावीधुकं चरुम् । 1 ॥ एतेन यजुषा यस्यामिष्टकायां शतरुद्रीयं जुहोति तस्यां प्रतिष्ठापयति । 2 ॥ (आपस्तम्बीयं_श्रौतसूत्रम्/प्रश्नः_17.12)
- ✓ Dharma śāstra texts such as karma vipāka saṅgraha describe the Śatarudrīyam as the cure for several diseases—

  अथ+उष्णज्वरहरं कर्मविपाकसङ्ग्रहे—

  > मङ्गलेषु च कार्येषु सततं कोपवान् नरः । उष्णज्वराभिभूतः स्यात् तत्पापस्यापनुत्तये ॥ सहस्रकलशस्नानं रुद्रेणेशस्य कारयेत् । ब्राह्मणान् भोजयेच्छतया जपो वै जातवेदसः ॥

  अथ शातातपोक्तं विविधज्वरहरम्–

  > देवस्वहरणाच्चैव जायते विविधज्वरः । ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव तु ॥ ज्वरे रुद्रजपं कुर्यान्महारुद्रं महाज्वरे । महारुद्रं जपेद्रौद्रे वैष्णवे तद्द्वयं जपेत् ॥

  अथ श्यावदन्तहरं शातातपोक्ते—

  > सुरापः श्यावदन्तः स्यात् प्राजापत्याष्टकं चरेत् । शर्कराया स्तुलाज़् सप्त प्रदद्यात्पापशुद्धये । जपित्वा च महारुद्रं दशांशं जुहुयात्तिलान् अभिषेकश्च कर्तव्यो मन्त्रैर्वरुणदैवतैः ॥

  अथ प्रकारान्तरेण प्रमेह हरम्—

  > तपस्विनीप्रसङ्गेन प्रमेहो जायते गदः । मासं रुद्रजपः कार्यो दद्यात् भक्त्या च काञ्चनम् ॥

  अथ वृषणव्याधिहरं कर्मविपाकसङ्ग्रहे—

नृपो भृत्यादि हस्तादीन् अपराधं विनैव यः । छेदयेत् तस्य मुष्कस्तु भवेद्दग्ध इवाग्निना ॥ शिलापृष्ठ सद्दक्षश्च सव्रणश्चाऽपिजायते । रुधिरं प्रस्रवेत् पश्चात् तस्येयं निष्कृतिः परा । शतरुद्रं जपेत् सम्यग् अष्टोत्तरसहस्रकम् ॥ यति चान्द्रायणं चैव कुर्यात् दद्याच्च गां ततः ।
जायते वृषणे यस्य व्याधिः परमदारुणः । जपित्वा शतसाहस्रं मुच्यते रुद्रसंहिताम् ॥

अथैकाहिकादि ज्वरग्रह हराणि कर्मविपाकसङ्ग्रहे—

तस्करो यो वृथा प्राणिहिंसको निर्दयश्च यः । आचाररहितो यश्च परधर्मस्य निन्दकः ॥ अधर्मनिरतो यश्च तानेतान् ज्वरसञ्ज्ञकः । ग्रहो गृह्णाति तन्मात्रात् एकरात्रज्वरी भवेत् ॥ द्विरात्रेण त्रिरात्रेण चतूरात्रज्वरेण च । शीतज्वरेण सततज्वरेणोऽष्णज्वरेण च ॥ युतो भवति तस्येयं निष्कृतिः शास्त्रचोदिता । चान्द्रायणं प्रकुर्वीत कुर्यात् कृच्छ्रातिकृच्छ्रकम् ॥ आज्यहोमो व्याहृतिभिरष्टोत्तरसहस्रकम् । सहकारप्रवालैश्च मध्वाक्तैर्जुहुयात्तथा ॥ जातवेदसमन्त्रेण दद्याद्धोमं च शक्तितः । सहस्रकलशस्नानमीश्वरस्य तु कारयेत् ॥

## 1.2 वेदाङ्गानि

All the veda mantras are to be known through vedāṇgās. The six vedāṅgās are śikṣā, chandas, vyākaraṇa, nirukti, kalpa and jyautiṣam. Among these,

- Śikṣā and Candas help to protect the form of mantras (śabda rakṣa);
- Vyākaraṇa and Nirukti help to protect the meaning of mantras (artha rakṣa);
- Kalpa and Jyautiṣam help to protect the usage of mantras (anuṣṭhāna rakṣa).

Thus, a philosophical understanding of these vedāṅgās is necessary to understand the deeper philosophy of Veda mantras.

This study focusses on the below texts of vedāṅgās, to corelate the philosophy of Sāṅkhya-Yoga darśanās and their relevance in understanding the Śatarudriyam.

| **Śabda rakṣa** | **Artha rakṣa** | **jñāna (anuṣṭhāna) rakṣa** |
|---|---|---|
| śikṣā<br>• Pāṇinīya Śikṣā | vyākaraṇam<br>• Nandikeśa Kāśikā on Maheśvara-sūtrās | jyautiṣam<br>• Bṛhat Pārāśara Horaśāstram;<br>• Sūrya Siddhānta; |

| | | |
|---|---|---|
| Chandas<br>• Chandas-sūtram of Piṅgalācārya | Nirukti<br>• Yāskācārya Niruktam | • Bṛhat Saṃhitā of Varāhamihirācārya<br>Kalpa<br>• Gautama dharmasūtrāni<br>• Karma Vipākaḥ (Madana mahārṇavam) |

## 1.3 तत्त्वार्थ दर्शनम्

Essentially, Indian philosophy is broadly categorized into 2 paths: Sāṅkhya and Yoga—

लोकेऽस्मिन् द्विधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ भगवद्गीता 3.3॥

Both these paths describe the "one" Brahman in several ways, as the Ṛgveda say – एकं सत् विप्रा बहुधा वदन्ति ।. Sāṅkhya mārga explains that supreme brahman as the individual self (Puruṣa), beyond the 24 elements of prakṛti. Yoga mārga provides the practice towards realizing the same through aṣṭāṅga-yoga techniques. Both Sāṅkhya and Yoga explain the union of prakṛti and puruṣa as the cause of creation, and that ignorance (avidyā) as the cause of sufferings. Realising the self, as the 25th tattva (puruṣa), who was neither bonded, nor released, but it's only the ignorance that gives this experience, is liberated from the 3-duḥkhās and the self is established in kaivalyam.

तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ साङ्ख्यकारिका 62॥,

**साङ्ख्ययोगदृष्ट्या सृष्टि वर्णनम् ।**

पातञ्जलदर्शनं साङ्ख्यप्रवचनभाष्यमिति प्रख्यातम् । योगदर्शने कापिलमनुश्रुत्य पञ्चविंशति तत्त्वानि निरूपितानि यथा—

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् (योगसूत्रम् 2.18) ।

इति जगतः वर्णनं क्रियते पातञ्जलयोगदर्शने । अतः जगत्सर्वं दृश्यमिति भावनया, त्रिधा दृश्यते सत्त्वरजस्तमो गुण प्रभेदैः । प्रकाशशीलने तु सत्त्वगुणं, क्रियायां च रजोगुणं, स्थितिशीलत्वे तमोगुणश्च, तथा त्रिगुणानां विभागः क्रियते । पुनः, स्थूलरूपेन द्विधा भवति यथा भूतात्मकमिन्द्रियात्मकं च । तत्र पञ्चभूतानि भावयन्ति स्थूलदृश्यम्

यथा जाग्रदवस्थायाम् । पञ्चतन्मात्रानि कुर्वन्ति सूक्ष्मदृश्यं यथा स्वप्नकाले । एकादशेन्द्रियाणि तु वस्तुभोगे करणान्येव च । प्रकृतिरेव दृश्यं, द्रष्टा तु पुरुषः । हठयोगादि शास्त्रपरम्परायां तावेव पार्वती-परमेश्वरौ वा शक्ति-शिवौ वेति प्रकीर्त्येते । तयोः सम्बन्धं भगवद्गीतायां वर्ण्यते यथा—

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।

पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥भगवद्गीता-13.21॥

एकादशेन्द्रियाणां च पञ्चभूतानां च पञ्चतन्मात्राणां चाहङ्कारस्य च बुद्धेश्च हेतुः प्रकृतिरुच्यते ।

- एकादशेन्द्रियाः = मनः + 5 ज्ञानेन्द्रियाणि + 5 कर्मेन्द्रियाणि च ।
    - श्रोत्रत्वक्चक्षुर्जिह्वानासिकाः पञ्चज्ञानेन्द्रियाणि ।
    - वाक्पाणिपादपायूपस्थाः पञ्चकर्मेन्द्रियाणि ।
- पृथिव्यापतेजोवायुराकाशाः पञ्चभूतानि ।
- शब्दस्पर्शरूपरसगन्धाः तन्मात्राणि ।
- अभिमान लक्षितम् अहङ्कार तत्त्वम् ।
- व्यवसायात्मिका तु बुद्धिः ।

एते चतुर्विंशति तत्त्वानि । एतेषां चतुर्विंशतिभ्यः तत्त्वेभ्यः परः केवलः साक्षी च पुरुष उच्यते ।

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्यानुपश्यः (योगसूत्रम् -2.20) ।

अतः पुरुषस्य भोक्तृत्वम् अविद्यया कल्प्यते । अतः योगदर्शने ईश्वरः प्रतिपादितः । स तु पुरुष एव, किन्तु विशेषलक्षणैः भासते—

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः (योगसूत्रम् 1.24) ।

तस्य वाचकः प्रणवः (योगसूत्रम्-1.27) ।

इति ईश्वरः प्रणवेन सञ्ज्ञितः । तथैव उपनिषद्वाक्यम् – ओमिति ब्रह्म (तैत्तिरीयोपनिषद्-1.8) । ततः जगदाविर्भावं वर्ण्यते तैत्तिरीयोपनिषदि यथा—

सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च । तत् सृष्ट्वा । तदेवानुप्राविशत् । (तैत्तिरीयोपनिषद्-2.6) इति ।

**<u>वागेव विश्वा भुवनानि जज्ञे</u>**

एतस्मिन् जगति, यत्किमप्यस्ति तत्सर्वं मनोकल्पितं वाङ्मयमेव । “शब्दस्य परिणामोऽयम्” इति वाक्यपदीयम् (1.120) । ऋग्मन्त्रोऽपि यथा—

वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् ।

अथेद्वाग् बुभुजे वाग्वुवाच पुरुत्रा वाचो न पदं यच्च नाह ॥ (वाक्यपदीयम्-स्वोपज्ञ-वृत्तिः1.120)

यथोक्तं च भागवतपुराणे—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।

हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ॥ भागवत-पुराणम्-12.6.37 ॥

तथाऽऽव्यक्तात् प्रणवात् नादः व्यक्तीभूतः । प्रणवस्य मात्रात्रयं सूचयति जाग्रत्स्वप्नसुषुप्त्यवस्थासु साक्षीभूतत्वं चापरामृष्टत्वं च । दृश्यरूपं सर्वं जगत् ततो प्रणवादेव व्यक्तः । यथा,

ततोऽभूत् त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् ।

यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥ भागवत-पुराणम्-12.6.39

प्रणवादेव अक्षर समाम्नायं सृज्यते । अन्तस्थाः (य-र-ल-व), ऊष्माः (श-ष-स-ह), स्वराः (अ, इ, उ, ऋ, ऌ, ए, ऐ, ओ औ), स्पर्शाः (कादि वर्गाक्षराः पञ्चविंशतिः) सर्वेऽपि प्रणवादेव भवन्ति । स्वरानां ह्रस्वदीर्घादि भेदाश्च स्मर्यन्ते ।

ततोऽक्षरसमाम्नायमसृजद् भगवानजः ।

अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥ भागवत-पुराणम्-12.6.43॥

तथैव पाणिनीयेषु महेश्वरसूत्रेषु शब्दब्रह्मणः जगद्व्यक्तीकरणं पञ्चभिस्सूत्रैश्च, तथा ब्रह्मणस्तोत्रं नवभिस्सूत्रैश्च क्रियते यथा—

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।

उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ (नन्दिकेश्वरकाशिका-1)